# 4 हास्ययोगः



(1)

आपणिकः : (ग्राहकं प्रति)
एतत् यन्त्रं क्रिणातु । क्रयणयोग्यम् अस्ति ।

ग्राहकः : एतस्य का विशेषता अस्ति ?

आपणिकः : एतत् यन्त्रं भवतः पञ्चाशत् प्रतिशतं कार्यभारम् अल्पं करिष्यति ।

ग्राहकः : तर्हि कृपया द्वे यन्त्रे ददातु ।



(2)

शिक्षकः : (छात्रस्य गृहकार्यं दृष्ट्वा)
भवतः गृहकार्ये बहवः दोषाः । तान् अपि भवान एकः एव करोति ।

छात्रः : महोदय ! एते सर्वे दोषाः अहम् एकः एव न करोमि । गृहपाठलेखने मम पिता अपि सहायतां करोति ।



(3)

गृहस्वामी : (अतिथिं प्रति) भवान् आगच्छतु ।
श्वानभयं न अनुभवतु ।

अतिथिः : किं सः न दशति ?

गृहस्वामी : तस्य दंशनस्वभावः अस्ति वा न वा इति अहम् अपि न जानामि । यतः एतस्य स्वभावस्य परीक्षणम् अधुना भविष्यति ।

(4)

एकदा चोरद्वयं वित्तकोषे लुण्ठनं करोति ।
बहूनि रूप्यकाणि प्राप्नोति । गृहम् आगत्य वार्तालापं करोति ।

प्रथमः चोरः : कियत् धनं प्राप्तं तस्य ज्ञानार्थं धनगणनां करोमि ।

द्वितीयः चोरः : व्यर्थश्रमं मा करोतु । श्वः वर्तमानपत्रे वार्ताम् आगमिष्यति एव । ततः गणनाज्ञानं भविष्यति ।



(5)

**वृद्धः शम्भुनाथः** : मम पत्नी मम भोजनस्य पश्चात् एव भोजनं करोति ।

**रमानाथः** : भवान् भार्यया सह भोजनं न करोति वा ?

**शम्भुनाथः** : तथा किमपि नास्ति । मम भोजनस्य पश्चात् सा भोजनं करोति - तस्य कारणम् अस्ति यतः आवयोः एका एव कृत्रिमदन्तावलिः अस्ति ।



## Glossary

**क्रिणातु** buy **आपणिकः** shopkeeper **प्रतिशतम्** per cent **क्रयणयोग्यम्** proper to be bought **द्वे यन्त्रे** two machines **दशनम्** bite **वित्तकोष** bank **लुण्ठनम्** loot **आगत्य** आकर **आवयोः** (after) coming **वर्तमानपत्रे** news paper **यतः** because **कृत्रिमदन्तावलि** (a set of) false teeth

## Exercise

1. **Pronounce the following words orally :**

   आपणिकः, क्रीणातु, पञ्चाशत्, दृष्ट्वा, गृहपाठलेखनम्, श्वानभयम्, दंशनस्वभावः, परीक्षणम्, चोरद्वयम्, लुण्ठनम्, रूप्यकाणि, आगत्य, व्यर्थश्रमम्, कृत्रिमदन्तावलिः

2. **Read Sanskrit words for the following words :**

   (1) खरीदी (2) बैंक (3) लूंट (4) प्रतिशत (5) दुकानदार

3. **Tell who speaks the following Sentences :**

   (1) तर्हि कृपया द्वे यन्त्रे ददातु ।

   (2) भवतः गृहकार्ये बहवः दोषाः ।

   (3) श्वानभयं न अनुभवतु ।

   (4) व्यर्थश्रमं मा करोतु ।

4. **Replace the underlined words with those given in brackets and frame other sentences :**

   (1) एतत् **यन्त्रं** क्रीणातु। (फेनकम्, पुस्तकम्, फलम्)

   (2) सा भोजनं करोति । (दुग्धपानम्, दानम्, प्रार्थनाम्)

   (3) व्यर्थश्रमं मा करोतु । (व्यर्थव्यवहारम्, दुर्व्यवहारम्, व्यर्थव्ययम्)

   (4) श्वानभयं न अनुभवतु । (चोरभयम्, सिंहभयम्, अन्धकारभयम्)

5. **Frame sentences. Follow the illustration :**

एतत् ________ ________ अस्ति । (यन्त्रम्, क्रयणम्)

एतत् यन्त्रं क्रयणयोग्यम् अस्ति ।

(1) एतत् ________ ________ अस्ति । (पुस्तकम्, पठनम्)

(2) एतत् ________ ________ अस्ति । (स्थानम्, भ्रमणम्)

(3) एतत् ________ ________ अस्ति । (चलचित्रम्, दर्शनम्)

(4) एतत् ________ ________ अस्ति । (जलम्, स्नानम्)

6. **Change forms of verbs. Follow the illustration :**

- भवति - भविष्यति भविष्यामि
- वदति - ________ ________
- करोति - ________ ________
- तरति - ________ ________

7. **Find out such jokes :**

**ज्ञातव्यम्**

| | | | | | |
|---|---|---|---|---|---|
| आम्रम् | - | Mango | कदलीफलम् | - | Banana |
| सीताफलम् | - | Custard-apple | नारङ्गम् | - | Orange |
| बदरम् | - | Berries | आमलकम् | - | Amaranth |
| सेवम् | - | Apple | निम्बूकम् | - | Lemon |
| जम्बूफलम् | - | Rose-apple | खर्बूजः | - | Watermelon |
| दाडिमम् | - | Pome granate | नारिकेलम् | - | Coconut |